मूर्च्छा सतृड् भवति पित्तकृते तथैव । कण्डू गुरुत्वकफसंस्रवसादतन्द्राः श्लेष्मात्मके मधुरमास्यमरोचके तु । सर्व्वात्मके पवनपित्तकफा बहूनि रूपाण्यथास्य हृदये समुदीरयन्ति । संरागशोकभयविप्लुतचेतसस्तु चिन्ताकृते भवति सोऽशुचिदर्शनाच्च” इति । “गुल्मान् प्लीहोदरं कालं हृल्लीसकमरोचकम्” इति सुश्रुतः । [शून्ये त्रि० ।

**अरोदन** न०अभावे न०त०। १रोदनाभावे । ब०। २क्रन्दन-

**अरोधन** न० अभावे न०त०। १रोधाभावे २आवरणाभावे ३गतिरोधके व्यापारे । न०ब० । ४तच्छून्ये त्रि० ।

**अरोध्य** त्रि० न रोध्यः । रोद्धुमशक्ये । [णशून्ये त्रि० ।

**अरोपण** न०अभावे न०त०। १रोपणाभावे न०ब०। २रोप-

**अरोष** पु०अभावे न०त०। १क्रोधाभावे । न०ब० । २क्रोधशून्ये त्रि० ।

**अरौद्र** त्रि०न रौद्रः विरोधे न०त०। १भीषणभिन्ने सौम्याकृतौ २ रागद्वेषादिशून्ये विष्णौ पु० । “अरौद्रः कुण्डली चक्री” विष्णुस० “कर्म रौद्रं, रागश्च रौद्रः, कोपश्च रौद्रः, त्रयं यस्य नास्ति अवाप्तसर्वकामत्वेन द्वेषरागादेरभावादित्यरौद्रः” भा० ।

**अर्क** तापे, स्तुतौ च चुरा०उभ०सक० सेट् । अर्कयति ते आर्चिकत् त । अर्कयामास अर्कितः अर्कयितुम् ।

**अर्क** पु० अर्च–कर्मणि घञ् कुत्वम् । १सूर्य्ये, २इन्द्रे, ३ताम्रे, ४स्फटिके, ५विष्णौ, ६पण्डिते, (आकन्द,)इति ख्याते ७वृक्षे, (आरख) इति ख्याते ८क्वाथविशेषे च । ९अर्चनीये त्रि० । “आ सूर्य्यो न भानुमद्भिरर्कैः” ऋ० ६,५,६ “अर्कैः अर्चनीयैः” भा० “ब्रह्मादिभिः पूज्यमानैरर्चनीयत्वादर्कः” भा० १०ज्येष्ठे” पु० । लक्षणया ११अर्काधिपे वारे १२सप्तमीतिथौ १३उत्तरफल्गुनीनक्षत्रे १४द्वादशसंख्यायाञ्च तत्र विष्णौ । “अर्को वाजसनः शृङ्गी” वि०सह० अर्कवृक्षे “अर्कः पलाशःखदिरः इति विष्णुध०। सूर्य्ये “अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी” सूर्य्यसि० “संपर्कादर्करोचिषाम्” माघः “स्पृष्ट जगत्पूज्यमयुज्य तार्कः” माघः इन्द्रे अर्कसोदरशब्दे उदा०। अर्कस्यापत्यम् इञ् । आर्किः सूर्यपुत्रे यमादौ, यमुनायां, तपत्याञ्च स्त्री अरुणात्मजशब्दे विवृतिः ।

**अर्ककला** स्त्री ६त० । शारदातिलके सूर्य्यस्य उपास्यत्वेनोक्ते द्वादशसंख्याके पीतवर्णे कादिडान्तवर्णभषिते कलाभेदे । ताश्च १“तपिनी २तापिनी ३धूम्रा ४मरीचि ५ज्वालिनी ६रुचिः । ७सुषुम्णा ८भोगदा ९विश्वा १०बोधिनी ११धारिणी १२क्षमा । काद्याश्च वसुदाः सौर्य्यो डान्ता स्ता द्वादशेरिताः” “वराभयकरा ध्येयाः श्वेतपीतारुणाः क्रमात्” शार० ति० ।

**अर्ककान्ता** स्त्री अर्कोऽर्ककिरणः कान्तोऽनुकूलो यस्याः कमक । (हुडहुड़िया) इति ख्याते १वृक्षे ६ब० । २सूर्य्यप्रियायाम् ३संज्ञायां छायायाञ्च अरुणप्रियाशब्दे विवृतिः ।

**अर्कक्षेत्र** न० ६त० “कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् । जीवार्किभानुजेज्यानां क्षेत्राणि स्वरजादयः” ज्योतिषोक्ते सूर्य्यस्वामिके सिंहराशौ ।

**अर्कचन्दन** पु० अर्कस्य प्रियःचन्दनः शाक०त० । रक्तचन्दने

**अर्कज** पु० अर्काज्जायते जन–ड ५त० । १यमादौ २तपत्यां ३यमुनायां च स्त्री ४अश्विनीकुमारयोः द्वि०ब०। ५सुग्रीवे ६कर्णे च । अरुणात्मजशब्दे विवृतिः ।

**अर्कतनय** पु० ६त० । राधासुते १ कर्णे २यमादौ च । अरुणात्मजशब्दे विवृतिः ।

**अर्कदुग्ध** न० अर्कस्य वृक्षस्य दुग्धमिव निर्य्यासः । अर्कवृक्षनिर्य्यासे श्वेतत्वेन दुग्धाकारे पदार्थे ।

**अर्कनयन** पु० अर्को नयनं यस्य । विराट्पुरुषे । “सूर्य्याचन्द्रमसावग्निर्यस्य नेत्राणि जज्ञिरे” पुरा० अनन्तबाहुं शशिसूर्य्यनेत्रम्” गीता अर्कइव दुर्दर्शं नयनमस्य । २दुर्द्दर्शलोचने त्रि०।

**अर्कनामन्** पु० अर्कं नामयति अनुकूलयति नम–णिच् कनि । रक्तार्कवृक्षे ।

**अर्कपत्र** पु० अर्कः सूर्य्यइव तीक्ष्णं पत्रं यस्य । १अर्कवृक्षे । अर्कपर्णोऽप्यत्र । २सुनन्दायाम् ३अर्कमूलायां स्त्री । ६त०। ४अर्कवृक्षस्य पत्रे न० “स कदाचिदर्कपत्राण्यभक्षयत् क्षुधार्त्तः तैर्भक्षितैरर्कपत्रैः” भा०आ०प० “देवराजो मया दृष्टो वारिवारणमस्तके । खादयत्यर्कपत्राणि” त्रिद०सु० । “सप्त वदरपत्राणि सप्तार्कपत्राणि च शिरसि निधायेति, माघसप्तम्यां स्नाने कृ०त० रघु० ।

**अर्कपर्ण** त्रि० अर्क इव रक्तं पर्णमस्य । १मन्दारे । ६त० २अर्कवृक्षपत्रे न० । [कर्मधा० । (आकन्द) २वृक्षभेदे ।

**अर्कपादप** पु० अर्कः अर्कवृक्षइव तीक्ष्णः पादपः । १निम्बे ।

**अर्कपुष्पी** स्त्री अर्कस्यार्कवृक्षस्य पुष्पमिव पुष्पमस्याः जातित्वात् ङीप् । २कटुम्बिनीवृक्षे । वा कप् । अत इत्त्वे अर्कपुष्पिकाप्यत्र ।

**अर्कप्रिया** स्त्री अर्कं प्रीणाति प्री–क । जवायाम् । ६त० । १सूर्य्यप्रियायां, २संज्ञादौ अरुणप्रियाशब्दे विवृतिः ।